

# रामचन्द्राय जनक

श्री भद्राचल रामदासु

www.aradhanam.org

रामचन्द्राय जनक राजजा मनोहराय

मामकाभीष्टदाय महित मङ्गलं

कोसलेशाय मन्द हास दास पोषणाय

वासवादि विनुत सद्वरद मङ्गलं

चारु मेघ रूपाय चन्दनादि चर्चिताय

हार कटक शोभिताय भूरि मङ्गलं

ललित रत्न मण्डलाय तुळसी वन मालिकाय

जलद सदृश देहाय चारु मङ्गलं

देवकी पुत्राय देव देवोत्तमाय

चाप जात गुरुवराय भव्य मङ्गलं

पुण्डरी काक्षाय पूर्ण चन्द्र वदनाय

अण्डज वाहनाय अतुल मङ्गलं

विमल रूपाय विविध वेदान्त वेद्याय

सुमुख चित्त कामिताय शुभग मङ्गलं

रामदासाय मृदुल हृदय कमल निवासाय
स्वामि भद्र गिरि वराय सर्व मङ्गलं

## श्री रामजयम्